# Shatkarmanam Kavacham Shatrumardanam

# ષટ્કર્મણાં કવચં શત્રુમર્દનમ્

## Document Information

Text title : shatrumardanamShaTkarmaNAMkavacham

File name : shatrumardanamShaTkarmaNAMkavacham.itx

Category : devii, kavacha

Location : doc_devii

Transliterated by : Divya KS

Proofread by : Divya KS

Description/comments : kriyoDDIshamahAtantra paTalaH 14

Latest update : April 30, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 30, 2021

*sanskritdocuments.org*

Shatkarmanam Kavacham Shatrumardanam

# ષટ્કર્મણાં કવચં શત્રુમર્દનમ્

શ્રીદેવ્યુવાચ -
શ્રુતં વટુકમાહાત્મ્યં પૂર્ણવિસ્મયકારકમ્ ।
ઇદાનીં શ્રોતુમિચ્છામિ કવચં વૈ ષટ્કર્મણામ્ ॥ ૧॥

શ્રી ઈશ્વર ઉવાચ -
શ ૃણુ દેવિ પ્રવક્ષ્યામિ યન્માં ત્વં પરિપૃચ્છસિ ।
શ્રવણાત્ પઠનાદ્વાપિ શત્રુનાશાય તત્ક્ષણાત્ ॥ ૨॥

શ્રીદેવ્યુવાચ -
ત્રૈલોક્યમોહનાર્થં તુ કવચં મે પ્રકાશય ।
ત્રૈલોક્યશત્રુ સંહન્તુ નાશિતં યત્ક્ષમં ભવેત્ ॥ ૩॥

એવમુક્તો મહાદેવઃ ક્રુદ્ધો ભૂત્વા જગત્પતિઃ ।
દેવીં પ્રબોધયામાસ વાક્યેનામૃતવર્ષિણા ॥ ૪॥

શ્રીમહાદેવ ઉવાચ -
પરાનિષ્ટે મહાદેવિ કુતસ્તે જાયતે મતિઃ ॥ ૫॥

શ્રીદેવ્યુવાચ -
જિઘાંસન્તં જિઘાંસીયાન્ન તેન બ્રહ્મહા ભવેત્ ।
યે યથા માં પ્રપદ્યન્તે શ્રુતિરસ્તિ પુરાતની ॥ ૬॥

યદિ તે વર્તતે દેવ દયા હિ કથ્યતાં મયિ ।
શત્રૂણાં પ્રાણનાશાર્થમુચ્ચાટનવશીકૃતૌ ॥ ૭॥

તેષાં હિ બલનાશાર્થં સર્વદા પ્રયતા નરાઃ ॥ ૮॥

ઈશ્વર ઉવાચ -
શ ૃણુ દેવિ મહાભાગે કાલાગ્નિપ્રાણવલ્લભે ।
યસ્ય ધારણમાત્રેણ શત્રૂણાં નાશનં ભવેત્ ॥ ૯॥

ધૃત્વા તુ પાદમૂલેન સ્પૃષ્ટ્વા દાસ ઇવાકરોત્ ।
શરણાગતમાત્રન્તુ નાશિતું નૈવ શક્યતે ॥ ૧૦॥

શ‍ૃણુ દેવિ મહાભાગે સાવધાનાવધારય ।
શત્રૂણાં પ્રાણનાશાર્થં કુપિતઃ કાલ એવ સઃ ॥ ૧૧॥

દશવક્ત્રા દશભુજા દશપાદાઞ્જનપ્રભા ।
કોટિસૂર્યપ્રભા કાલી મમ શત્રૂન્ વિનાશય ।
નાશયિત્વા ક્ષણં દેવિ અન્યશત્રૂન્ વિનાશય ॥ ૧૨॥

ક્રીં ક્રીં ક્રીં ઉગ્રપ્રભે વિકટદંષ્ટ્રે પરપક્ષં મોહય મોહય પચ
પચ મથ મથ દહ દહ હન હન મારય મારય યે માં હિંસિતુમુદ્યતા
યોગિનીચક્રૈસ્તાન્ વારય વારય છિન્ધિ છિન્ધિ ભિન્ધિ ભિન્ધિ કરાલિનિ
ગૃહ્ણગૃહ્ણ ઓં ક્રીં ક્રીં ક્રીં ક્રીં સ્ફૂર સ્ફૂર પૂર પૂર પૂન પૂન
ચૂલ્વ ચૂલ્વ ધક ધક ધમ ધમ મારય મારય સર્વજગદ્વશમાનય
ૐ નમઃ સ્વાહા ।
ઇતિ તે કવચં દેવિ ભદ્રકાલ્યા પ્રચોદિતમ્ ।
ભૂર્જે વિલિખિતઞ્ચૈતત્ સ્વર્ણસ્થં ધારયેદ્યદિ ॥ ૧૩॥

શિખાયાં દક્ષિણે બાહૌ કણ્ઠે વા ધારયેદ્યદિ ।
ત્રૈલોક્યં મોહયેત્ક્રોધાત્ત્રૈલોક્યં ચૂર્ણયેત્ક્ષણાત્ ॥ ૧૪॥

પુત્રવાન્ધનવાન્ધીમાન્ નાનાવિદ્યાનિધિર્ભવેત્ ।
બ્રહ્માખાદીનિ શસ્ત્રાણિ તદ્ગાત્રસ્પર્શનાત્તતઃ ॥ ૧૫॥

શત્રવો નાશમાયાન્તિ રજતેન પ્રધારિતમ્ ।
માસમાત્રેણ શત્રૂણાં મહવિપદકારણમ્ ॥ ૧૬॥

યં યં શત્રું સ્મરન્મર્ત્યઃ કવચં પઠતિ ધ્રુવમ્ ।
તં તં નાશયતે સદ્યસ્તથ્યં તે તદ્વદામ્યહમ્ ॥ ૧૭॥

ધારણે ભજતે શત્રુઃ કણ્ઠશોચં સદા ભવેત્ ।
હત્કમ્પો જાયતે તાવદ્યાવત્તસ્ય કૃપા ન ચેત્ ॥ ૧૮॥

ઇતિ ક્રિયોડ્ડીશે મહાતન્ત્રરાજે દેવીશ્વરસંવાદે ષટ્કર્મણાં કવચં સમાપ્તમ્ ।
ચતુર્દશઃ પટલઃ

Proofread by Divya KS

*Shatkarmanam Kavacham Shatrumardanam*

pdf was typeset on April 30, 2021

Please send corrections to *sanskrit@cheerful.com*